শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীৱণ্শঠকোপ শ্রীপরাঙ্কুশ যতীন্দ্র মহাদেশিকৈরনুগৃহীতা

# ॥ শ্রী লক্ষ্মীনৃসিংহপ্রপত্তিঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী লক্ষ্মীনৃসিংহপ্রপত্তিঃ ॥

শ্রী শ্রীনিৱাসাহ্ৱয যোগিৱর্যং
    নারাযণং যোগিৱরং তথৈৱ।
শ্রী যোগিৱর্য রঘুৱীর ৱেদ -
    কোটীরসংজ্ঞং গুরুমাশ্রযামি ॥ 1 ॥

অহোবিলে গারুডশৈলমধ্যে
    কৃপাৱশাৎ কল্পিত সন্নিধানম্।
লক্ষ্ম্যা সমালিঙ্গিত ৱামভাগং
    লক্ষ্মীনৃসিংহং শরণং প্রপদ্যে ॥ 2 ॥

শ্রীৱণ্ শঠারাতি যতীন্দ্রমাদ্যং
    প্রেম্না স্বযং প্রেষমনুং প্রদায।
স্বারাধনে প্রেরযতি স্ম যস্তং
    লক্ষ্মীনৃসিংহং শরণং প্রপদ্যে ॥ 3 ॥

সর্ৱস্য লোকস্য সমীহিতানাং
    প্রদান দীক্ষা ৱশতস্সদৈৱ।
শ্রিযা সমেতং শ্রিতদোষহন্ত্র্যা
    লক্ষ্মীনৃসিংহং শরণং প্রপদ্যে ॥ 4 ॥

যস্যাভৱৎ ভক্তজনার্তিহন্তুঃ
    পিতৃৎৱমন্যেষ্ৱৱিচার্য তূর্ণম্।
স্তম্ভেৱতারস্তমনন্যলভ্যং
    লক্ষ্মীনৃসিংহং শরণং প্রপদ্যে ॥ 5 ॥

যমীক্ষিতুং দেৱগণোঽতিরুষ্টং
শক্তৌ ন শক্নোতি চতুর্মুখাদিঃ।
প্রসাদিতো ভক্তজনেন যস্তং
লক্ষ্মীনৃসিংহং শরণং প্রপদ্যে॥ **6**॥

ৱামৎৱমদ্য ত্যজ সংশ্রিতেষু
নাস্তীহ কশ্চিৎকিল নাপরাধী।
লক্ষ্ম্যেতি ৱামাঙ্কগযোচ্যমানং
লক্ষ্মীনৃসিংহং শরণং প্রপদ্যে॥ **7**॥

শ্রী ৱীরৱদ্রাঘৱ ৱেদমৌলিং
যোগীন্দ্রকৢপ্তেশ্শুভতাপপুণ্ড্রৈঃ।
নামাদিভির্মাং যুতমাতনোদ্য -
স্তং শ্রীনৃসিংহং শরণং প্রপদ্যে॥ **8**॥

শ্রীমদ্রহস্যত্রযসারপাঠ -
প্রারংভকালে তৱ সর্ৱসিদ্ধিঃ।
স্যাদিত্যুপশ্রুত্যভিধাযকং মে
লক্ষ্মীনৃসিংহং শরণং প্রপদ্যে॥ **9**॥

ভাষ্যপ্রদানাৱসরে তু ৱীর -
রঘূদ্বহাম্নাযশিখার্য রূপী।
স্বপ্নাগতো ভাষ্যমদত্ত যো মে
তং শ্রীনৃসিংহং শরণং প্রপদ্যে॥ **10**॥

যচ্ছ্রীনিৱাসাখ্য মুনীন্দ্রতো মাং
সংপ্রাপ্ত ৱেদান্তযুগং ৱ্যতানীৎ।
তদর্পিতং স্বীকৃতমদ্ভরং তং
লক্ষ্মীনৃসিংহং শরণং প্রপদ্যে॥ **11**॥

স্বপ্নে রমাৱাসমুনীন্দ্ররূপী
স্বযং সমাগত্য মমাপি দেৱঃ।
ত্রিদণ্ডকাষাযমদান্মুদা য -
স্তং শ্রীনৃসিংহং শরণং প্রপদ্যে॥ **12**॥

আরাধনং স্বস্য কথং মযেতি
ভীতং সদা পদ্মলতা মুখেন।
আশ্ৱাস্য মামপ্যকরোৎ কৃতার্থং
লক্ষ্মীনৃসিংহং শরণং প্রপদ্যে॥ **13**॥

শঠারিনারাযণযোগিৱর্য -
পরাঙ্কুশস্বামি পরাঙ্কুশাদ্যৈঃ।
যঃ পূজিতঃ শ্রীনিধিযোগিমুখ্যৈঃ
তং শ্রীনৃসিংহং শরণং প্রপদ্যে॥ **14**॥

নারাযণ শ্রীরঘুৱীর ৱেদ -
কোটীর নারাযণ মানিৱাসৈঃ।
যোগীশ্ৱরৈ রন্ৱহ মর্চিতো য -
স্তং শ্রীনৃসিংহং শরণং প্রপদ্যে॥ **15**॥

ৎৱদ্দত্তৱাচা তৱ কিঙ্করেণ
ৎৱৎপ্রীতিকামেন মযা কৃতেন।
স্তোত্রেণ লক্ষ্মীনৃহরেঃ স ৱিষ্ণুঃ
প্রীতো ভৱ ৎৱং করুণার্দ্রদৃষ্টিঃ॥ **16**॥

পরাঙ্কুশাখ্যেন তপোধনেন
ভক্ত্যা নৃসিংহস্য কৃতা প্রপত্তিঃ।
পাপঠ্যতে যেন ভৱেৎ স তস্য
পূর্ণং কৃপাপূর্ণকটাক্ষপাত্রম্॥ **17**॥

॥ ইতি শ্রী লক্ষ্মীনৃসিংহপ্রপত্তিঃ সমাপ্তা ॥